# बाल भारती पब्लिक स्कूल, पीतम पुरा, दिल्ली।

साप्ताहिक योजना - 18- 22 जनवरी
कक्षा -नवमी
विषय - संस्कृत
उपविषय - पर्यावरणम् , स्वर्णकाकः , चित्रवर्णनम् , संस्कृतानुवादः
कालांश- 3
शिक्षण अधिगम - छात्र पठित पाठों को भली भांति समझ सकेंगे।
सहायक सामग्री -
https://youtu.be/lhGH6yXd9ss
https://youtu.be/kL2bjZIH5l0

BBPS PITAMPURA

**प्रश्न 1 प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया संस्कृतेन पञ्च वाक्यानि लिखत।**



**मञ्जूषा** - प्रकृतेः , विविधवर्णानि , पुष्पाणि , हरीतिमा , सुन्दरवृक्षाः ,आकाशे , बद्दलाः ,शुद्धं, पर्यावरणं ,प्राणवायुं , वितरन्ति , अनिवार्यः

**प्रश्न 2 प्रदत्त पदानां मेलनं कुरुत।**

| पदानि | पर्यायपदानि |
|---|---|
| पुष्णाति | मलिन |
| कुक्षौ | करोति |
| दुहिता | प्राप्नोत् |

| | |
|---|---|
| विदधति | गर्भे |
| विषाक्त | पोषणं करोति |
| आससाद | सुता |
| व्याजहार | भवनम् |
| प्रासादः | अकथयत् |

**प्रश्न 3 प्रश्न निर्माणं चिनुत**

1 पर्यावरणरक्षणं धर्मस्यैव अङ्गमिति ऋषयः प्रतिपदितवन्तः।

(क ) कः ( ख ) के (ग ) काः

2 वनवृक्षाः निर्विवेकं छिद्यन्ते।

(क ) कीदृशं (ख ) कथं ( ग ) किं

3 सूर्योदयात्पूर्वमेव सा तत्रोपस्थिता।

(क ) कस्मात् (ख ) कस्य (ग ) कदा

4 प्रकृतिः प्राणिनां संरक्षणाय यतते।

(क ) कासां (ख ) केन (ग ) केषां

5 विविधाः विहगाः कलकूजितैस्तत्र श्रोत्ररसायनं ददति।

(क ) के (ख ) काः (ग ) कैः

**प्रश्न 4 संस्कृतेन अनुवादं कुरुत।**

1. मानव ही प्रकृति को नष्ट करता है।
2. हमें वृक्ष लगाने चाहिए।
3. बगीचे में पक्षी चहचहाते हैं।
4. बगीचे की शोभा फूलों से होती है।
5. माली पौधों को पानी से सींचता है

BBPS-PITAMPURA

**प्रश्न 5 प्रदत्तं गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

1. प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः तर्पयति च सुखसाधनैः। पृथिवी, जलं, तेजो, वायुः आकाशश्चास्याः प्रमुखानि तत्त्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकोऽनेनेति पर्यावरणम्। यथाऽजातशिशुः मातृगर्भे सुरक्षितस्तिष्ठति तथैव मानवः पर्यावरणकुक्षौ। परिष्कृतं प्रदूषणरहितं च पर्यावरणमस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसङ्कल्पं माङ्गलिकसामग्रीञ्च प्रददाति। प्रकृतिकोपैः आतङ्कितो जनः किं कर्तुं प्रभवति? जलप्लावनैः, अग्निभयैः, भूकम्पैः, वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मङ्गलम्?

**एकपदेन उत्तरत**

1 प्रकृतिः कथं सर्वान् तर्पयति ?

2 मातृगर्भे कः सुरक्षितः तिष्ठति ?

**पूर्णवाक्येन उत्तरत**

1 प्रकृतेः प्रमुखानि तत्त्वानि कानि सन्ति ?

2 मानवः कैः सन्तप्तः अस्ति ?

**प्रश्न 7 गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

4. चिरकालं भवने चित्रविचित्रवस्तूनि सज्जितानि दृष्ट्वा सा विस्मयं गता। श्रान्तां तां विलोक्य काकः प्राह–पूर्वं लघुप्रातराशः क्रियताम्–वद त्वं स्वर्णस्थाल्यां भोजनं करिष्यसि किं वा रजतस्थाल्यामुत ताम्रस्थाल्याम्? बालिका व्याजहार–ताम्रस्थाल्यामेवाहं निर्धना भोजनं करिष्यामि। तदा सा कन्या चाश्चर्यचकिता सञ्जाता यदा स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं पर्यवेषितम्। नैतादृक् स्वादु भोजनमद्यावधि बालिका खादितवती। काको ब्रूते–बालिके! अहमिच्छामि यत्त्वं सर्वदा चात्रैव तिष्ठ परं तव माता वर्तते चैकाकिनी। त्वं शीघ्रमेव स्वगृहं गच्छ।

**एकपदेन उत्तरत**

1 भवने कीदृशानि वस्तूनि सज्जितानि आसन् ?

2 स्वर्णकाकेन कस्यां भोजनं पर्यवेषितम् ?

**पूर्णवाक्येन उत्तरत**

1 बालिका किं न खादितवती ?

2 काकः श्रान्तां कन्यां विलोक्य किं प्राह ?

**प्रश्न 6 भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत।**

अनुच्छेदे 'अकारयत्' इति क्रियायाः कर्तृपदं किम्?

(क) स्वर्णकाकः (ख) काकः (ग) ताम् (घ) भोजनम्/कस्यै

'खादन्' इति पदस्य कः पर्यायः अत्र प्रयुक्तः?

(क) हसन् (ख) भक्षयन् (ग) प्रातः (घ) भोजनम्

अनुच्छेदे 'लुब्धा वृद्धा' इति कर्तृपदस्य क्रियापदं किमस्ति?

(क) आसीत् (ख) न्यवसत् (ग) अभिज्ञातवती (घ) नियुक्ता

'प्रशंसयन्ती' इति पदस्य कः विपर्ययः अनुच्छेदे आगतः?

(क) गर्विता (ख) अभिज्ञातवती (ग) प्रावोचत् (घ) निर्भर्त्सयन्ती

'विविधाः रोगाः' अत्र विशेष्यपदं किम्?

(क) रोगाः (ख) विविधाः (ग) विविधरोगः (घ) रोगम्

) 'विषाक्तं जलं नद्यां निपात्यते।' अत्र विशेषणपदं किमस्ति?

(क) जलम् (ख) विषाक्तम् (ग) नद्याम् (घ) निपात्यते

**प्रश्न 7 घटनाक्रमानुसारं वाक्यानि पुनर्लिखत।**

(i) इति उक्त्वा काकः कक्षायाः अभ्यन्तरात् तिस्रः मञ्जूषाः निस्सारयत्।

(ii) लोभाविष्टा सा बृहत्तमां मञ्जूषां गृहीतवती।

(iii) भो नीचकाक! अहम् आगता अस्मि, मह्यं तण्डुलमूल्यं यच्छ।

(iv) किञ्चित् कालात् अनन्तरं एकः विचित्रः काकः तत्र समुपाजगाम।

(v) एकस्याः वृद्धायाः एका विनम्रा मनोहरा च कन्या आसीत्।

(vi) कन्या प्रावोचत्—अहं निर्धनमातुः कन्या अस्मि। अतः ताम्रसोपानेन एव आगमिष्यामि।

(vii) तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा स्त्री अवसत्।

(viii) एकदा सा पुत्रीम् आदिदेश—सूर्यातपे तण्डुलान् खगेभ्यो त्वं रक्ष।